IJCRT.ORG ISSN : 2320-2882

INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)

An International Open Access, Peer-reviewed, Refereed Journal

# उपनिषदां समत्वदृष्टिविमर्शः

**रविदासकिस्कुः, शोधच्छात्रः, संस्कृत एवं प्राच्यविद्या अध्ययन संस्थान, जवाहरलालनेहरूविश्वविद्यालयः, नवदेहली-११००६७**

## शोधसारः

उपनिषदः वेदानां ज्ञानकाण्डरूपाः अन्तिमभागाः सन्ति, येषु परब्रह्मणः, आत्मनः, जगतः च तत्त्वस्वरूपं गम्भीरतया निरूप्यते। "उप + नि + सद्" इति धात्वर्थसम्भवात् गुरुसमीपे उपविश्य रहस्यविद्यायाः ग्रहणमित्यस्य शब्दस्य तात्पर्यम्। उपनिषदां प्रमुखविषयः ब्रह्मविद्यास्ति, या जीवस्य बन्धननिवृत्तिं मोक्षप्राप्तिञ्च साधयति। एते ग्रन्थाः अद्वैततत्त्वस्य, ब्रह्मात्मैक्यस्य, तथा आत्मविद्यायाः गूढार्थान् प्रकाशयन्ति। उपनिषदः भारतीयदर्शनपरम्परायाः परमं रहस्यमयमाध्यात्मिकञ्च साहित्यं वर्तते। तासु प्रतिपादितं ब्रह्मतत्त्वमात्मविद्या, तथा विश्वैकत्वभावना मानवजीवनस्य परमं साध्यं निर्दिशन्ति। विशेषतया समत्वदृष्टिः यया सर्वेषु भूतेषु एकमेव ब्रह्मतत्त्वं पश्यत्युपनिषदां केन्द्रीयविचारोऽस्ति। समत्वभावोऽयं न केवलं दार्शनिकविचाररूपेण, अपितु नैतिकजीवनस्याप्याधाररूपेण प्रतिष्ठितः। **"सर्वं खल्विदं ब्रह्म"**[1], **"तत्त्वमसि"**[2], **"अहं ब्रह्मास्मि"**[3] इत्यादयः महावाक्यान्यस्य समत्वदृष्टेः तात्त्विकाधारं निर्मिमितवन्ति। एषा दृष्टिः भेदभावं निरस्य सर्वेषु प्राणिषु आत्मभावस्यानुभूतेः प्रेरणां ददाति। अस्य शोधपत्रस्य उद्देश्यमुपनिषदां समत्वदृष्टेः स्वरूपं, तत्त्वाधारं, तस्याः नैतिकसामाजिकप्रासंगिकताञ्च सम्यक् विमर्शयितुमस्ति। अस्मिन् लेखे प्रमुखोपनिषदां दृष्टान्तैः सह समत्वभावस्य विवेचनं क्रियते, येनाधुनिकसमाजे अप्यस्य तत्त्वस्य उपादेयता प्रकाशते।

**कूटशब्दाः -** समत्वदृष्टि, उपनिषदः, ब्रह्मतत्त्वम्, आत्मविद्या, अद्वैतवादः, विश्वबन्धुत्वम्, अभेददर्शनम्, महावाक्यानि, नैतिकमूल्याः, आध्यात्मिकता।

## समत्वदृष्टेः तात्त्विकपरिभाषा

उपनिषदां परमार्थतत्त्वविमर्शे "समत्वदृष्टिः" इति न केवलं नैतिकोपदेशरूपा संज्ञा, अपितु अद्वैतब्रह्मविद्यायाः परिपाकभूता तत्त्वनिष्ठा इति स्वीकरणीया। यत्र सर्वभूतेषु एकमेव ब्रह्मतत्त्वं दृश्यते, नानात्वस्य परमार्थतोऽभावोऽवगम्यते, जीवब्रह्मणोः अभेदः साक्षात्क्रियते सैव समत्वदृष्टिः। अस्याः तात्त्विकपरिभाषा शाङ्करवेदान्ते स्पष्टतया प्रतिपाद्यते। अद्वैतदर्शने ब्रह्मैव परमार्थसत्यम्,

[1] छान्दोग्योपनिषद् ३.१४.१

[2] छान्दोग्योपनिषद् ६.८.७

[3] बृहदारण्यक १.४.१०

जगन्मिथ्या, जीवो ब्रह्मैव नापरः इति सिद्धान्तत्रयं प्रसिद्धम्। अनेन सिद्धान्तेन भेददृष्टेः अविद्याकृतत्वमभेददृष्टेः विद्याजन्यत्वञ्च निरूप्यते। अतः समत्वदृष्टिः नाम विद्याफलभूता ब्रह्मात्मैक्यनिष्ठा। बृहदारण्यकोपनिषदि प्रतिपाद्यते- **“नेह नानास्ति किञ्चन।”**[4] अत्र ‘नानास्ति’ इति निषेधेन नानात्वस्य परमार्थतोऽभावः सूचितः। शाङ्करभाष्ये अत्र उक्तं यत् नानात्वं नामविद्याविषयः, यदा तत्त्वज्ञानमुदेति, तदा नानात्वदर्शनं निवर्तते। नानात्वाभावे सर्वेषां तत्त्वतः समत्वं सिद्ध्यति। तदेवोपनिषद्यन्यत्र उच्यते- **“यत्र हि द्वैतमिव भवति तत्र इतरेतरं पश्यति।”**[5] अत्र ‘द्वैतमिव’ इति ‘इव’-शब्देन द्वैतस्य मिथ्यात्वं सूचितम्। शङ्कराचार्यः भाष्ये प्रतिपादयति- द्वैतदर्शनमविद्याकल्पितम्, परमार्थतः तु अद्वैतमेव। यदा सर्वं ब्रह्मैव, तदा ‘इतर’ इति कश्चन नास्ति। अतः समत्वदृष्टिः अद्वैतदर्शनस्यानिवार्यपरिणामः। छान्दोग्योपनिषदि प्रतिपादितं महावाक्यं- **“सर्वं खल्विदं ब्रह्म।”**[6] शाङ्करभाष्येऽत्र व्याख्यातं यत् किंचिदिदं दृश्यते, तत्सर्वं ब्रह्मस्वरूपमेव, ब्रह्मणोऽन्यत्वस्तु नास्ति। यदि सर्वं ब्रह्म, तर्हि भेदकल्पना केवलमविद्याजन्या। समत्वदृष्टिः तर्हि ब्रह्मव्याप्तिसाक्षात्कारः। पुनः उच्यते- **“तत्त्वमसि श्वेतकेतो।”**[7] महावाक्यस्यास्य शाङ्करव्याख्यायामुपाधिनिरासपूर्वकोऽभेदः प्रतिपाद्यते। ‘तत्’ इति परब्रह्म, ‘त्वम्’ इति प्रत्यगात्मा, उभयोः तत्त्वतोऽभेदः। उपाधिभेदात्व्यवहारिकभेदः दृश्यते, परमार्थतः तु एकमेव तत्त्वम्। यदि जीवब्रह्मणोः अभेदः, तर्हि सर्वजीवानां तत्त्वतः समत्वं निःसंशयं सिद्धम्। ईशावास्योपनिषदि समत्वदृष्टेः भावनिक-दार्शनिकरूपं विशदीकृतम् - **“यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः। तत्र को मोहः कः शोकः एकत्वमनुपश्यतः॥”**[8] अत्र ‘एकत्वमनुपश्यतः’ इति पदेन समत्वदृष्टेः चरमावस्था निर्दिश्यते। शङ्कराचार्यः भाष्ये वदति - यदा ज्ञानी सर्वेषु भूतेषु आत्मैक्यं पश्यति, तदा मोहशोकौ निवर्तेते। मोहः भेददर्शनजन्यः, शोकः तस्यैव परिणामः। अतः समत्वदृष्टिः दुःखनिवृत्तेः कारणम्। अस्य दार्शनिकाधारः ब्रह्मसूत्रभाष्यस्यादौ प्रसिद्धे अध्यासभाष्ये दृश्यते। शङ्कराचार्यः तत्राध्यासं परिभाषयति **“स्मृतिरूपः परत्र पूर्वदृष्टावभासः।”** आत्मन्यनात्माध्यारोपः, अनात्मनि आत्माध्यारोपः च संसारस्य मूलम्। अध्यासोऽयमेव अहं-मम-भावस्य, भेददृष्टेः, रागद्वेषयोः च कारणम्। विद्यानिवृत्तौ अध्यासः नश्यति, तदात्मस्वरूपं प्रकाशते। आत्मस्वरूपस्य प्रकाशे सर्वेषु आत्मैक्यदर्शनं भवति एषैव समत्वदृष्टिः। **“अहं ब्रह्मास्मि।”**[9] इति वाक्ये शङ्कराचार्यः प्रतिपादयति ‘अहं’ इति प्रत्यगात्मा, सैव ब्रह्म। यदि ज्ञानी आत्मानं ब्रह्मरूपेण वेत्ति, तर्हि सः सर्वेषां भूतेषु तदेव ब्रह्म पश्यति। अत्र समत्वं न कृतकसमानता, किन्तु तत्त्वनिष्ठा। व्यवहारिकदृष्ट्या भेदः दृश्यते - देहभेदः, वर्णभेदः, ज्ञानभेदः, सामाजिकविभागाः च। किन्तु शाङ्करवेदान्ते द्विविधं सत्यं स्वीक्रियते व्यवहारिकं परमार्थिकञ्च। व्यवहारिकसत्ये भेदव्यवहारः अनुवर्तते, परमार्थतः तु अद्वैतमेव। समत्वदृष्टिः परमार्थदृष्टिः, सा व्यवहारनिरासं न करोति, किन्तु व्यवहारस्य मिथ्यात्वबोधं जनयति। अतः ज्ञानी यद्यपि व्यवहारतः भेदं पश्यति, तथापि तत्त्वतः सर्वत्र आत्मैक्यमेव अवगच्छति। गीताऽपि एतदेव प्रतिपादयति - **“विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि। शुनि चैव श्वपाके च पण्डिताः समदर्शिनः॥”**[10] शाङ्करभाष्ये ‘समदर्शिनः’ इति पदस्यार्थः आत्मैक्यदर्शनसम्पन्नाः। समत्वदृष्टेः

[4] बृहदारण्यकोपनिषद् ४.४.१९
[5] बृहदारण्यकोपनिषद् २.४.१४
[6] छान्दोग्योपनिषद् ३.१४.१
[7] छान्दोग्योपनिषद् ६.८.७
[8] ईशावास्योपनिषद् ७
[9] बृहदारण्यक १.४.१०
[10] गीता ५.१८

तात्त्विकफलमभयप्राप्तिः। बृहदारण्यके उक्तम् - **"यत्र तु सर्वमात्मैवाभूत् तत्केन कं पश्येत्?"**[11] यदा सर्वमात्मरूपं, तदा अन्यस्याभावात् भयस्यापि अभावः। भयस्य मूलं द्वैतम्, अद्वैतदर्शने अभयम्। अतः समत्वदृष्टिः अभयदृष्टिः अपि। अन्ततः मुण्डकोपनिषदि प्रतिपादितम् - **"ब्रह्मविद् ब्रह्मैव भवति।"**[12] ब्रह्मविदः दृष्टिः ब्रह्ममयी, तस्य सर्वत्र समत्वभावः स्वाभाविकः। एवं समत्वदृष्टिः शाङ्करवेदान्तदृष्ट्या न केवलं नैतिकगुणः, न च सामाजिकसमानतामात्रम्, किन्तु अविद्यानिवृत्तिजन्या ब्रह्मात्मैक्यनिष्ठा, या नानात्वदर्शनस्य परमार्थतो निरसनं करोति, सर्वभूतानां तत्त्वतः समतां प्रतिपादयति, मोहशोकभयनिवृत्तिं जनयति, मोक्षरूपपरिपूर्णताञ्च साधयति। अतः तात्त्विकपरिभाषैषा समत्वदृष्टिः नामाविद्यानिवृत्त्या प्रकटितं ब्रह्मात्मैक्यदर्शनं, यत्र नानात्वस्य परमार्थतोऽभावबोधेन सर्वेषु भूतेषु एकमेव तत्त्वमनुभूयते, सैव मोक्षस्वरूपा परमार्थनिष्ठा।

## उपनिषदां ब्रह्मवादे समत्वदृष्टेः मूलाधारविमर्शः

भारतीयदर्शनपरम्परायामपनिषदः ब्रह्मविद्यायाः परमप्रधानप्रमाणग्रन्थाः मन्यन्ते। तेषां प्रमुखलक्ष्यं ब्रह्मतत्त्वस्य प्रतिपादनम्, आत्मविद्याया उद्घाटनं तथा जीवब्रह्मणोः ऐक्यस्य प्रकाशनञ्चास्ति। उपनिषदां प्रतिपादितः ब्रह्मवादः केवलमाध्यात्मिकतत्त्वज्ञानं न, अपितु मानवजीवनस्य नैतिकसामाजिकदृष्टेः अपि मूलाधारोऽस्ति। अस्य ब्रह्मवादस्य स्वाभाविकपरिणामः समत्वदृष्टिः इति स्वीक्रियते।

समत्वदृष्टिः नाम सर्वेषु भूतेषु समानभावस्यनुभवः। यदा साधकः सर्वभूतानां मूलतत्त्वं ब्रह्म एव इति बोधं प्राप्नोति, तदा तस्य दृष्टौ न कश्चित् भेदः अवशिष्यते। जाति-भेदः, वर्ण-भेदः, जीवभेदः वा तत्र न विद्यते। अतः उपनिषदां ब्रह्मवादः समत्वदृष्टेः तात्त्विकमूलाधारः इति निश्चितम्।

उपनिषदः सर्वत्र ब्रह्मणः सर्वव्यापकत्वं, सर्वभूतान्तरात्मत्वं तथा जगत्कारणत्वं प्रतिपादयन्ति। सन्दर्भेऽस्मिन् कठोपनिषदत्यन्तं महत्त्वपूर्णं प्रमाणं प्रददाति - **"एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति। तमात्मस्थं येऽनुपश्यन्ति धीराः तेषां सुखं शाश्वतं नेतरेषाम्॥"**[13] मन्त्रस्यास्य तात्पर्यं यत् एक एव परमात्मा सर्वेषां भूतानामन्तरात्मा रूपेण स्थितोऽस्ति। स एव एकः सन् बहुधा जगति प्रतीयते। ये धीराः तं परमात्मानं स्वात्मन्यनुभवन्ति, ते एव शाश्वतसुखं प्राप्नुवन्ति। अत्र स्पष्टतया प्रतिपाद्यते यत् सर्वेषु भूतेषु एक एव आत्मा अस्ति। अस्य ज्ञानस्य परिणामः समत्वदृष्टिः एव। यतः यदा सर्वे प्राणिनः एकस्यैव परमात्मनः विविधप्रकाशाः इति बोधः जायते, तदा द्वेषः, असमानता, परपीडनभावः च स्वयमेव नश्यन्ति। एवमेव मुण्डकोपनिषद् आत्मैक्यदर्शनस्य महत्त्वं प्रतिपादयति - **"ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण। अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्॥"**[14] अत्र प्रतिपादितं यत् इदं सर्वं जगत् ब्रह्मस्वरूपमेवास्ति। अग्रे ब्रह्म, पृष्ठे ब्रह्म, दक्षिणतः ब्रह्म, उत्तरतः ब्रह्म  सर्वत्र ब्रह्मैव व्याप्य स्थितम्। यदा साधकः एतादृशं सर्वव्यापकं ब्रह्मतत्त्वमनुभवति, तदा तस्य दृष्टौ कश्चित् भेदः न भवति। सर्वेषु भूतेषु ब्रह्मदर्शनं भवति। एषा एव समत्वदृष्टिः। तथैव श्वेताश्वतरोपनिषद् परमात्मनः सर्वभूतान्तरात्मत्वं निरूपयति - **"एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥"**[15] अस्य मन्त्रस्य भावार्थः यत् एक एव देवः (परमब्रह्म) सर्वेषु भूतेषु गूढरूपेण

[11] बृहदारण्यकोपनिषद् २.४.१४
[12] मुण्डकोपनिषद् ३.२.९
[13] कठोपनिषद् २.२.१२
[14] मुण्डकोपनिषद् २.२.११
[15] श्वेतास्वतरोपनिषद् ६.११

स्थितोऽस्ति। सः सर्वव्यापी, सर्वभूतान्तरात्मा, सर्वकर्मणां साक्षी तथा चेतनस्वरूपोऽस्ति। अत्र स्पष्टं भवति यत् समस्तप्राणिनामन्तराले एक एव चेतनतत्त्वं स्थितमस्ति। तस्मादुपनिषदां दृष्ट्या कोऽपि परः न, कोऽप्यपरः न, सर्वे ब्रह्मस्वरूपा एव। एवञ्च तैत्तिरीयोपनिषद् ब्रह्मणः जगत्कारणत्वं प्रतिपादयति - **"यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व तद्ब्रह्म॥"**[16] मन्त्रस्यास्य तात्पर्यं यत् यतः सर्वाणि भूतान्युत्पद्यन्ते, येन जीवन्ति, यत्र चान्ते लीयन्ते तत् ब्रह्म इति ज्ञेयम्। अत्र ब्रह्मणः सर्वकारणत्वं प्रतिपादितम्। यदा सर्वे प्राणिनः एकस्यैव कारणस्य उत्पादाः इति ज्ञायते, तदा तेषां मध्ये भेददृष्टिः न युक्ता भवति। तस्मात् समत्वदृष्टिः तर्कतोऽपि सिद्धा भवति। अतः उपनिषदां ब्रह्मवादस्य मूलसिद्धान्तः सर्वात्मभावः इति स्पष्टं दृश्यते। यदात्मा सर्वेषु भूतेषु समानरूपेण वर्तते इति ज्ञानं भवति, तदा साधकस्य व्यवहारदृष्टिः अपि परिवर्तते। सः सर्वेषु प्राणिषु मैत्रीभावं, करुणामहिंसां तथा बन्धुत्वभावञ्चानुभवति। **"यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते॥"**[17] अस्य मन्त्रस्य तात्पर्यं यत् परमात्मा सर्वज्ञः सर्वविद् चास्ति। तस्य स्वरूपं ज्ञानमयमस्ति। तस्मादेव अस्य जगतः नामरूपात्मकं विश्वं प्रकटितं भवति। यतः समस्तजगतः कारणं ब्रह्म एव, तस्मात् सर्वेषु भूतेषु एकस्यैव तत्त्वस्य स्थितिः अस्ति। यदा साधकः एतत् ब्रह्मतत्त्वं बोधति, तदा सः सर्वेषु प्राणिषु समानं ब्रह्मस्वरूपं पश्यति। अस्य अनुभवे भेदबुद्धिः नश्यति, समत्वदृष्टिः च उदेति। मुण्डकोपनिषदि उच्यते **"यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः। तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापि यन्ति॥"**[18] अस्य मन्त्रस्यार्थः यथा प्रज्वलितादग्नेः सहस्रशः विस्फुलिङ्गाः उत्पद्यन्ते, तथैवाक्षरब्रह्मणः विविधाः प्राणिनोत्पद्यन्ते। अत्र उपनिषद् दर्शयति यत् सर्वे प्राणिनः ब्रह्मणः एव अंशरूपेण प्रकटिताः सन्ति। यदा एषा अनुभूतिर्भवति यत् सर्वे जीवाः एकस्यैव ब्रह्मतत्त्वस्य प्रकाशाः सन्ति, तदा सर्वेषु भूतेषु समानदृष्टिः स्वयमेव जायते। अयं समत्वदृष्टेः दार्शनिकाधारोऽस्ति। **"सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि। ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः॥"**[19] अस्य मन्त्रस्य तात्पर्यं यत् योगयुक्तचित्तः पुरुषः सर्वेषु भूतेषु आत्मानं पश्यति तथा सर्वभूतान्यात्मन्यनुभवति। अत्र समदर्शनम् समत्वदृष्टिः वा स्पष्टतया प्रतिपादितास्ति। यः साधकः ब्रह्मात्मैक्यज्ञानं प्राप्तवान्, तस्य दृष्टौ न कोऽपि भेदः भवति। सः सर्वेषु प्राणिषु समानभावं पश्यति। एषा एव उपनिषदां समत्वदृष्टिः। **"सत्यं ज्ञानमनन्तं ब्रह्म।"**[20] अत्र ब्रह्मणः स्वरूपं निरूपितम्। ब्रह्म सत्यस्वरूपं, ज्ञानस्वरूपमनन्तस्वरूपञ्चास्ति। यतः ब्रह्मानन्तमस्ति, तस्मात् तस्य व्यापनं सर्वत्रास्ति। अतः सर्वेषु भूतेषु ब्रह्मणः स्थितिः अस्ति। एतत् ज्ञात्वा साधकः सर्वेषु प्राणिषु समानं ब्रह्मस्वरूपं पश्यति। ज्ञानादस्मात् समत्वदृष्टिः तथा विश्वबन्धुत्वभावोदेति। प्रश्नोपनिषदि भणितमस्ति यत् **"प्राणो हि भूतानामायुः।"**[21] अस्य मन्त्रस्याभिप्रायः यत् प्राणः सर्वेषां प्राणिनां जीवनाधारोऽस्ति। सः सर्वेषु भूतेषु समानरूपेण कार्यं करोति। यदा ज्ञायते यत् एक एव प्राणतत्त्वं सर्वेषु प्राणिषु प्रवर्तते, तदा सर्वे प्राणिनः समानजीवनधारिणः इति बोधः जायते। अस्य परिणामः समत्वदृष्टिः एव। अतः निष्कर्षतः वक्तुं शक्यते यत् उपनिषदां ब्रह्मवादः केवलमाध्यात्मिकतत्त्वज्ञानं न, अपितु समत्वदृष्टेः तथा

[16] तैत्तिरीयोपनिषद् ३.१
[17] मुण्डकोपनिषद् १.१.९
[18] मुण्डकोपनिषद् २.१.१
[19] श्वेताश्वतरोपनिषद् ६.२९
[20] तैत्तिरीयोपनिषद् २.१
[21] प्रश्नोपनिषद् २.१३

विश्वबन्धुत्वभावस्य दार्शनिकमूलाधारोऽस्ति। ब्रह्मणः सर्वव्यापकत्वज्ञानात् सर्वेषु भूतेषु समानभावोत्पद्यते, एषा एव उपनिषदां शिक्षायाः सार्वकालिकमहत्तास्ति।

## समत्वदृष्टेः आध्यात्मिकस्वरूपम्

समत्वदृष्टिः नाम सा परमाध्यात्मिकी स्थिति, यात्मब्रह्मणोः अभेदसाक्षात्कारात् स्वयमेव प्रादुर्भवति। उपनिषदां मतानुसारं यदा साधकः अविद्याकल्पितं नानात्वदर्शनं परित्यज्य सर्वभूतेषु एकमेवात्मतत्त्वं पश्यति, तदा तस्य चित्ते समत्वभावः स्वाभाविकतया विकसितो भवति। एषा दृष्टिः न केवलं नैतिकसमता, अपि तु परमार्थतत्त्वस्यानुभवरूपाध्यात्मिकी अवस्था इति निर्णीयते। ईशोपनिषद्-मन्त्रेषु समत्वदृष्टेः अत्यन्तं गूढं स्वरूपं निरूपितम्। तत्र प्रतिपाद्यते- **"ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्"**[22] अस्य मन्त्रस्य तात्पर्यम् यत्किञ्चिदपि जगति दृश्यते, तत्सर्वमीश्वरस्यावरणेनाच्छन्नम्, तेन सर्वेषां वस्तूनां तत्त्वतः एकत्वमेव सिद्ध्यति। एषा एव समत्वदृष्टिः, या ईश्वरव्याप्तिज्ञानादुत्पद्यते। तथैव - **"विद्यां चाविद्यां च यस्तद्वेदोभयं सह"।**[23] यदा साधकः विद्ययात्मस्वरूपं ज्ञात्वा अविद्याजन्यं भेददर्शनं त्यजति, तदा तस्य चित्ते समत्वभावः स्थिरीभवति। समत्वभावोऽयमाध्यात्मिकपरिपक्वतायाः लक्षणम्। ईशोपनिषद्-मन्त्रे पुनोच्यते- **"यस्मिन् सर्वाणि भूतानि आत्मैवाभूद्विजानतः। तत्र को मोहः कः शोकः एकत्वमनुपश्यतः॥"**[24] अत्र प्रतिपाद्यते यत्समत्वदृष्टिः ज्ञानजन्या। यदा 'अहं' 'इदम्' इति भेदबुद्धिः निवर्तते, तदा सर्वत्रात्मैकत्वस्यानुभवे सति न कश्चन विरोधः, न द्वेषः, न मोहः च भवति। अतः समत्वमाध्यात्मिकज्ञानस्य स्वाभाविकः परिणामः। तैत्तिरीयोपनिषद्-ग्रन्थे ब्रह्मस्वरूपस्यानन्दरूपता, सर्वाधारत्वञ्च प्रतिपाद्यते। अत्र समत्वदृष्टिः ब्रह्मानुभवस्य स्वाभाविकफलरूपेण दृश्यते। **"सत्यं ज्ञानमनन्तं ब्रह्म"।**[25] अनन्तब्रह्मणः सर्वत्र व्यापित्वात् सर्वेषां भूतानां तस्मिनभेदः सिद्ध्यति। यदा साधकः एतदनुभवति, तदा सः कस्यापि प्रति भेदभावं न करोति, अपि तु सर्वत्र समानतत्त्वं पश्यति एषा समत्वदृष्टिः। तथैव **"आनन्दो ब्रह्मेति व्यजानात्"।**[26] अत्र ब्रह्मणः आनन्दरूपता प्रतिपाद्यते। यदा साधकः ब्रह्मानन्दमनुभवति, तदा तस्य चित्ते न कश्चन द्वेषः, न रागः, न भेदभावोऽवशिष्यते। आनन्दरूपे ब्रह्मणि सर्वेषामभेददर्शनं स्फुटं भवति, यत् समत्वदृष्टेः आध्यात्मिकस्वरूपम्। तथैव कठोपनिषद्-मन्त्रे आत्मतत्त्वस्य सर्वव्यापकता निरूप्यते - **"एको वशी सर्वभूतान्तरात्मा एकं रूपं बहुधा यः करोति। तमात्मस्थं येऽनुपश्यन्ति धीरास्तेषां सुखं शाश्वतं नेतरेषाम्॥"**[27] अस्य मन्त्रस्य अभिप्रायः यद्यपि जगति नानात्वं दृश्यते, तथापि तत्त्वतः एकमेव ब्रह्म सर्वत्र वर्तमानम्। यदा साधकः एतत् तत्त्वं ज्ञात्वा सर्वेषु एकमेवात्मानं पश्यति, तदा तस्य दृष्टिः समत्वमयी भवति। अतः समत्वदृष्टिः अद्वैतब्रह्मज्ञानस्यानिवार्यफलम्। एवं पुनः मुण्डकोपनिषदे भणितमस्ति **"ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म**

---

[22] ईशावास्योपनिषद् १
[23] ईशावास्योपनिषद् ११
[24] ईशावास्योपनिषद् ७
[25] तैत्तिरीयोपनिषद् २.१
[26] तैत्तिरीयोपनिषद् ३.६
[27] कठोपनिषद् २.२.१२

**पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण। अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्॥"**[28] यदा ज्ञायते यत् सर्वतः ब्रह्मैव व्याप्यास्ति, तदा कस्यापि वस्तुनः पृथक् सत्ता न स्वीक्रियते। अनेन भावेन साधकः सर्वेषु समानतत्त्वदर्शनं करोति, यत् समत्वदृष्टेः आध्यात्मिकरूपम्।

## समत्वदृष्टेः सामाजिकपरिप्रेक्ष्यः

समत्वदृष्टिः नाम सर्वेषु प्राणिषु समानभावेनावलोकनं, यत्र न कश्चन उच्चः, न कश्चन नीचः इति निश्चयः भवति। एषा दृष्टिः उपनिषदां केन्द्रीयतत्त्वेषु प्रमुखतया विराजते। सामाजिकजीवने अस्याः महत्त्वमत्यधिकं दृश्यते, यतः अस्याः आधारेण समाजे समता, सौहार्दं, बन्धुत्वञ्च सुदृढं भवति। **"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितम्॥"** मन्त्रस्यास्य तात्पर्यमस्ति यदात्मा सर्वेषु भूतेषु समानरूपेण वर्तमानोऽस्ति। यदा मनुष्यः आत्मज्ञानं प्राप्नोति, तदा सः सर्वान्समानतया पश्यति। अस्य ज्ञानस्य फलरूपेण सामाजिकजीवने जाति-वर्ण-लिङ्ग-आर्थिकभेदाः क्षीयन्ते। तदेव उपनिषदन्यत्र वदति- **"यत्र वा अस्य सर्वमात्मैवाभूत्तत्केन कं जिघ्रेत्तत्केन कं पश्येत्तत्केन कं शृणुयात्तत्केन कमभि वदेत्तत्केन कं मन्वीत तत्केन कं विजानीयात्॥"**[29] स्पष्टमत्र दर्श्यते यत् यदा सर्वमात्मस्वरूपं ज्ञायते, तदा 'अयं भिन्नः' इति भावना नश्यति। सामाजिकपरिप्रेक्ष्ये एषानुभूतिः समतायाः परमाधारः भवति, यतः अन्यत्वबुद्धेः अभावेन द्वेषः, स्पर्धा, अन्यायः च नश्यन्ति। **"यन्मनसा न मनुते येनाहुर्मनो मतम्। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते॥"**[30] अस्यार्थः यत् तत्त्वं मनसा न गम्यते, किन्तु येन मनः एव ज्ञायते, तत् ब्रह्म। एतस्मात् ज्ञायते यत् ब्रह्म सर्वेषां चेतनानां मूलमस्ति। अतः सर्वे जनाः तस्मिन् एव एकस्मिन् तत्त्वे प्रतिष्ठिताः सन्ति। सामाजिकदृष्ट्या एषा भावना सर्वेषां प्रत्यादरभावं जनयति। तथैव **"यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्॥"**[31] इति मन्त्रः अहंकारनिवृत्तिं सूचयति। अत्र बोध्यते यत् यः ब्रह्मणः अनिर्वचनीयत्वं जानाति, सः अहंकारं त्यजति। अहंकाराभावे समदृष्टिः स्वयमेव उदेति। सामाजिकजीवने अहंकारः एव भेदभावस्य कारणं भवति; तस्मात् तस्य निवृत्त्या समत्वं सुलभं भवति। **"सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात्॥"**[32] अस्य तात्पर्यमस्ति यत् व्यक्तिगतः आत्मा एव ब्रह्म। यदा एषानुभूतिः जायते, तदा 'अहं' त्वमिति भेदः लीयते। सामाजिकदृष्ट्या एषा भावना सर्वभेदानां मूलच्छेदं करोति। अन्यत्र च- **"प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः"**[33] अत्राद्वैतस्वरूपस्यात्मनः निरूपणं कृतम्। अद्वैतदृष्ट्या सर्वे भेदाः उपशान्ताः भवन्ति। यदा मनुष्यः एतादृशीं दृष्टिं स्वीकुर्वति, तदा तस्य व्यवहारः सर्वेषु समानः भवति। सामाजिकरूपेण एषावस्था शान्तेः, समतायाः, बन्धुत्वस्य चाधारभूतास्ति।

## समत्वदृष्टेः मोक्षसाधनत्वम्

[28] मुण्डकोपनिषद् २.२.११
[29] बृहदारण्यकोपनिषद् २.४.१४
[30] केनोपनिषद् १.५
[31] केनोपनिषद् २.३
[32] माण्डूक्योपनिषद् २
[33] माण्डूक्योपनिषद् ७

समत्वदृष्टिः केवलं नैतिकगुणविशेषः न, अपितु मोक्षस्य प्रमुखं साधनमित्युपनिषदः प्रतिपादयन्ति। यदा साधकः सर्वेषु आत्मानं पश्यति, तदा तस्याविद्या-जनितभेदबुद्धिः निवर्तते, ततः बन्धननिवृत्तिः सञ्जायते, या मोक्षस्य स्वरूपम्। **"मनस्यैवानुद्रष्टव्यं नेह नानास्ति किञ्चन"**[34] इति।

अस्य तात्पर्यमस्ति यदत्र किञ्चिदपि नानात्वं नास्ति, सर्वं खलु एकमेव तत्त्वम्। यदा साधकः एतदनुभवति, तदा तस्य समत्वदृष्टिः दृढा भवति। भेददृष्टेः अभावे राग-द्वेषादयः क्लेशाः नश्यन्ति, ततः कर्मबन्धनं विनश्यति, एष एव मोक्षमार्गः। तथैव **"एष त आत्मा सर्वेषां भूतानामन्तरः"**[35]इति। अत्रात्मनः सर्वभूतान्तर्यामित्वं प्रतिपाद्यते। यदा साधकः सर्वेषु आत्मानं पश्यति, तदा तस्य दृष्टिः समत्वरूपा भवति। एषा समता मोक्षस्य कारणं भवति, यतः भेदज्ञानस्य नाशः एव बन्धननिवृत्तिः। **"प्रतिबोधविदितं मतममृतत्वं हि विन्दते। आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्॥"**[36] अर्थात् प्रत्येकबोधे यत् ब्रह्म ज्ञायते, तस्य ज्ञानादमृतत्वं (मोक्षः) लभ्यते। एषानुभूतिः सर्वेषु समानरूपेण ब्रह्मदर्शनं जनयति, यतः ब्रह्म सर्वत्र विद्यमानम्। अतः समत्वदृष्टिः अत्र मोक्षस्य साधनरूपेण प्रतिष्ठिता। पुनश्च **"इह चेदवेदीदथ सत्यमस्ति, न चेदिहावेदीन्महती विनष्टिः॥"**[37] अत्र ब्रह्मज्ञानस्यानिवार्यता सूच्यते। यः इह एव ब्रह्म जानाति, सः मोक्षं प्राप्नोति। एतत् ज्ञानं समत्वदृष्टेः एव फलम्, यतः ब्रह्म सर्वेषु समानं पश्यति। **"नान्तःप्रज्ञं न बहिष्प्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञम्.....॥"**[38] इत्यादिना तुरीयस्य स्वरूपं निरूप्यते। अत्र तुरीयावस्था सर्वभेदातीतत्वेन वर्ण्यते। यदा साधकः एतामवस्थामनुभवति, तदा सः समत्वदृष्ट्या सर्वं पश्यति। भेदाभावः एव मोक्षः, अतः एषा दृष्टिः मोक्षसाधनम्। तथैव- **"अद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः"**[39] इति। अद्वैतज्ञानात् समत्वदृष्टिः उदेति, यतः द्वैतमेवासमतायाः कारणम्। अद्वैतबोधेन सर्वे भेदाः निवर्तन्ते, ततः मोक्षः सिद्ध्यति। **"सत्यं ज्ञानमनन्तं ब्रह्म"**[40] इति। अत्र ब्रह्मणोऽनन्तत्वं प्रतिपाद्यते। अनन्तत्वात् तस्य सर्वव्यापकत्वं सिद्धं भवति, अतः सर्वेषु समानतया स्थितम्। एतत् ज्ञानं समत्वदृष्टिं जनयति, या मोक्षस्य कारणम्। अन्यत्र - **"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह। आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति॥"**[41] अत्र ब्रह्मणः अगोचरत्वं वर्ण्यते। यदा साधकः एतदनुभूय सर्वत्र तदेव ब्रह्म पश्यति, तदा समत्वदृष्टिः दृढा भवति। एषा समता अविद्यां नाशयित्वा मोक्षं ददाति।

## समत्वदृष्टेः व्यवहारिक प्रयोजनम्

समत्वदृष्टिः नाम सर्वेषु भूतेषु आत्मैक्यबुद्ध्या समभावेन व्यवहारः। एषा दृष्टिः केवलं तत्त्वचिन्तनपरिधौ न सीमिता, अपि तु दैनन्दिनजीवने प्रत्यक्षतया उपयुज्यमाना महान् नैतिकाधारोऽस्ति। यः मनुष्यः सर्वेषु आत्मानं पश्यति, सः न कस्यचित् द्वेषं करोति, न कञ्चन हीनं मन्यते, अपितु सर्वेषां प्रति न्याययुक्तं, करुणामयं, सम्यग्व्यवहारं करोति। उपनिषदः अस्याः समत्वदृष्टेः व्यवहारिकप्रयोजनं बहुधा प्रतिपादयन्ति। **"यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति**

34 बृहदारण्यकोपनिषद् ४.४.१९
35 बृहदारण्यकोपनिषद् ३.७.१५
36 केनोपनिषद् २.४
37 केनोपनिषद् २.५
38 माण्डूक्योपनिषद् ७
39 माण्डूक्योपनिषद् ७
40 तैत्तिरीयोपनिषद् २.१.१
41 तैत्तिरीयोपनिषद् २.९.१

**सर्वभूतेषु चात्मानं ततो न विजुगुप्सते”**[42] अस्य मन्त्रस्य अभिप्रायः यः सर्वेषु आत्मानं पश्यति, सः कस्यापि प्रति द्वेषं न करोति। व्यवहारिकतः एषा दृष्टिः सामाजिकजीवने अत्यन्तोपयोगिनी, यतः अस्याः प्रभावेन मनुष्यः परस्परं सम्मानं करोति, न कञ्चन तिरस्करोति, न चान्यायं करोति। तथैव **“यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मोहः कः शोकः एकत्वमनुपश्यतः”**[43] अत्र दर्श्यते यत् समत्वदृष्टेः फलरूपेण मोहः शोकः च नश्यतः। व्यवहारिकजीवने एषा स्थितिः मानसिकशान्तेः, सौहार्दस्य चाधारः भवति। छान्दोग्योपनिषद् प्रतिपादयति **“सर्वं खल्विदं ब्रह्म॥”**[44] अर्थात् सर्वं जगत् ब्रह्मरूपम्। यदा एषा भावना व्यवहारिकजीवने स्वीकृता भवति, तदा मनुष्यः सर्वेषां प्रति समानभावं धारयति। न कस्यापि प्रति घृणा, न कस्यापि प्रत्यात्याचारः इति समत्वदृष्टेः प्रत्यक्षप्रयोगः। तथैव **“तत्त्वमसि श्वेतकेतो॥”**[45] अत्र जीव-ब्रह्मैक्यं प्रतिपाद्यते। यदा मनुष्यः अन्येषु अपि तदेव ब्रह्म पश्यति, तदा सः समदृष्ट्या व्यवहारं करोति। एषा दृष्टिः सामाजिकसमता, बन्धुत्वञ्च वर्धयति। बृहदारण्यकोपनिषद् वदति **“अहं ब्रह्मास्मि॥”**[46] अस्य ज्ञानस्य फलरूपेण मनुष्यः आत्मसम्मानञ्चान्येषां प्रति समानभावञ्च धारयति। व्यवहारिकतः एषा दृष्टिः आत्मविश्वासं तथा परस्परसम्मानं वर्धयति। श्वेताश्वतरोपनिषदि भणितमस्ति **“एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा॥”**[47] अत्रैकस्य परमात्मनः सर्वेषु स्थितिः प्रतिपाद्यते। व्यवहारिकजीवने एषा भावना सर्वेषां प्रत्यादरभावं जनयति। तथैव **“सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः। सर्वव्यापी स भगवांस्तस्मात्सर्वगतः शिवः॥”**[48] अत्र पुनः एकत्वदर्शनं बोध्यते। यः एतां दृष्टिं धारयति, सः सर्वेषु समानतया व्यवहारं करोति। एवमुपनिषदां मतानुसारं समत्वदृष्टिः व्यवहारिकजीवने अनिवार्या। एषा मनुष्यं समदर्शिनं, न्यायप्रियं, करुणामयञ्च करोति। सामाजिकजीवने शान्तिः, समरसता, बन्धुत्वञ्चास्याः फलानि सन्ति। अतः समत्वदृष्टेः व्यवहारिकप्रयोजनमत्यन्तं व्यापकं, यत् व्यक्तिगताचारादारभ्य वैश्विकसमन्वयपर्यन्तं विस्तारं गच्छतीति।

## उपसंहारः

अस्य समग्रस्य “उपनिषदां समत्वदृष्टिविमर्शः” इत्यस्याध्ययनस्य परिसमाप्तौ निःसन्दिग्धतया प्रतिपद्यते यत् समत्वदृष्टिः उपनिषदां हृदयस्थं तत्त्वमस्ति। एषा दृष्टिः केवलं किञ्चित् नैतिकोपदेशरूपा न, अपि तु परमार्थतत्त्वस्यानुभवरूपा चेतनास्ति, यात्मब्रह्मणोः अभेदबोधात्स्वाभाविकतया प्रस्फुटति। उपनिषदां सर्वेषु स्थलेषु यत् **“एकमेवाद्वितीयम्”, “सर्वं खल्विदं ब्रह्म”, “अहं ब्रह्मास्मि”, “तत्त्वमसि”** इत्यादिभिः महावाक्यैः प्रतिपादितं तत्त्वम्, तदेव समत्वदृष्टेः दार्शनिकाधारः इति स्पष्टं भवति। समत्वदृष्टेः मूलमात्मैक्यज्ञानम्। यदा साधकः श्रवण-मनन-निदिध्यासनादि-साधनैः आत्मनः यथार्थस्वरूपं वेत्ति, तदा तस्य अन्तःकरणे नानात्वबुद्धिः शनैः शनैः उपशाम्यति। “अयं मम, अयं परः” इति भेदवृत्तिः अविद्याया परिणामोऽस्ति; तस्याः निवृत्त्या सर्वेषु आत्मभावना एव अवशिष्यते। एषा एव समत्वदृष्टिः, या न केवलं ज्ञानरूपा, अपि तु अनुभवरूपान्तरिकस्थितिः अस्ति। अस्याः समत्वदृष्टेः फलस्वरूपं साधकस्य व्यक्तित्वे गम्भीरः

---

[42] ईशोपनिषद् ६

[43] ईशोपनिषद् ७

[44] छान्दोग्योपनिषद् ३.१४.१

[45] छान्दोग्योपनिषद् ६.८.७

[46] बृहदारण्यकोपनिषद् १.४.१०

[47] श्वेताश्वतरोपनिषद् ६.११

[48] श्वेताश्वतरोपनिषद् ३.११

परिवर्तनः दृश्यते। सः रागद्वेषविरहितः, अहंकारशून्यः, सर्वेषु समानभावयुक्तः च भवति। न सः कस्यापि प्रति द्वेषं करोति, न कञ्चन तिरस्करोति, अपि तु सर्वेषां प्रति मैत्रीं, करुणां, क्षमाञ्च वहति। अस्य व्यवहारः न केवलं स्वस्य हिताय, अपितु सर्वलोकहिताय प्रवर्तते। अत्र स्पष्टं दृश्यते यत् समत्वदृष्टिः आन्तरिकशुद्धेः, मानसिकशान्तेः च मूलकारणमस्ति।

सामाजिकपरिप्रेक्ष्ये अपि समत्वदृष्टेः महत्त्वमत्यन्तं व्यापकं दृश्यते। यत्र मानवसमाजः जाति-वर्ण-धन-लिङ्गादिभिः कृत्रिमभेदैः विभक्तः दृश्यते, तत्र उपनिषदां समत्वदृष्टिः एतान्सर्वान्भेदान्निरस्तुं समर्थास्ति। यतः यदि सर्वेषु एकैवात्मा वर्तते, तर्हि कस्यापि प्रत्यान्यायः, अत्याचारः, अवमानः वा कर्तुं न युक्तः। अतः एषा दृष्टिः सामाजिकन्यायस्य, समरसतायाः, विश्वबन्धुत्वस्य च दृढाधारः भवति। आध्यात्मिकदृष्ट्या तु समत्वदृष्टिः मोक्षसाधनत्वेनापि परिगण्यते। उपनिषदः प्रतिपादयन्ति यत् बन्धनस्य मूलं भेददृष्टिः, अविद्या च। यदा समत्वदृष्ट्या सर्वं ब्रह्मरूपमेवानुभूयते, तदा कर्तृत्व-भोक्तृत्वादयः कल्पितभेदाः स्वयमेव निवर्तन्ते। एषा अवस्था एव मोक्षः, यत्र न कश्चन भेदः, न कश्चन दुःखम्, केवलं शुद्ध-चैतन्यस्वरूपस्यानुभूतिरेवावशिष्यते। अतः समत्वदृष्टिः न केवलं साधनम्, अपितु मोक्षस्वरूपस्यानुभवोऽपीति कथ्यते।

वर्तमानकाले, यत्र असहिष्णुता, द्वेषः, संघर्षः च सर्वत्र वर्धते, तत्र उपनिषदां समत्वदृष्टिः विशेषतया प्रासङ्गिकी दृश्यते। एषा मानवजातिमेकत्वेन पश्यितुं शिक्षयति, तथा च परस्परं सहास्तित्वेन, सौहार्देन, समन्वयेन च जीवितुं प्रेरयति। यदि एषा दृष्टिः व्यवहारिकजीवने आचर्यते, तर्हि न केवलं व्यक्तिगतशान्तिः, अपि तु वैश्विकशान्तिः अपि सुलभा भवेत्। अतः उपसंहारतः इदं निर्णीयते यत् उपनिषदां समत्वदृष्टिविचारः न केवलं दार्शनिकमूल्यं वहति, अपितु जीवनव्यवहारस्य, समाजव्यवस्थायाः, आध्यात्मिकसाधनायाः च सर्वेषां क्षेत्रेषु परमोपयोगी अस्ति। एषा दृष्टिः मानवजीवनस्य सर्वोच्चं साध्यं, तथा च तस्य साधनमप्यास्ति। अतः सर्वैः साधकैः एषा समत्वदृष्टिः न केवलं ज्ञातव्या, अपितु आचरितव्या, यतः अस्याः आचरणेन एव आत्मकल्याणं, समाजकल्याणं, विश्वकल्याणञ्च साध्यते इति निःसंशयं।

## सन्दर्भग्रन्थसूची


1) ईशादि नौ उपनिषद्, शाङ्ङ्करभाष्यार्थ (हिन्दी अनु.), गीताप्रेस गोरखपुर,

2) ईशादि नौ उपनिषद्, शाङ्करभाष्यार्थ, गीताप्रेस, गोरखपुर,

3) ईशोपनिषद्, अनुवादकःतारणीश, रामनारायणलाल एण्ड के., इलाहाबाद.

4)कठोपनिषद् (हिन्दी अनु.), गीताप्रेस, गोरखपुर,

5) कठोपनिषद्, (हिन्दी व्या. आद्याप्रसाद), अक्षयवट प्रकाशन, इलाहाबाद, २००८

6) कठोपनिषद्, शाङ्करभाष्य, (हिन्दी व्या. वीरेन्द्रकुमार), जमुना पाठक, वाराणसी, १९७४

7) काठकोपनिषद्, (संशो. वैजनाथ), आनन्दाश्रम संस्कृत ग्रन्थावलि, ख्रिस्ताब्दी, १९७७

8) केनोपनिषद् शाङ्करभाष्य (हिन्दी अनु.), रामकृष्ण मठ, नागपुर.

9) छान्दोग्योपनिषद् (नित्यानन्दकृत् मिताक्षरा व्याख्या), आनन्दाश्रम संस्कृत ग्रन्थावलिः, ख्रिस्ताब्दाः, १९१५

10) छान्दोग्योपनिषद्, सानुवाद शांकरभाष्यसहित, गीताप्रेस, गोरखपुर,

11) वृहदारण्यकोपनिषद्, शाङ्करभाष्य, (संशो. काशीनाथ शास्त्री), आनन्दाश्रम संस्कृत ग्रन्थावलिः, ख्रिस्ताब्दा, १९८२

12) बृहदारण्यकोपनिषद्, शाङ्करभाष्यार्थ, गीताप्रेस, गोरखपुर

13) बृहदारण्यकोपनिषद्, सानुवाद शांकरभाष्यसहित, गीताप्रेस, गोरखपुर

14) Achintya, Swami, The Principal Eleven Upanisad, Nirnayasagar Prss, Bombay, 1910.

15) Nikhilananda Swami, The Upnisads, Phoenix House, London, 1951.

16) Sharma, D.S., The Upanishads(tra.), Bharatiya Vidya Bhavan, Bombay, 1961.

16) श्रीमद्भवद्गीता, श्री धराचार्य प्रणीता (सुबोधनी व्याख्यया विभूषिता, हिन्दी अनु. राजदेव मिश्र), सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, > संक्षेप शारीरक, स्वामी रामतीर्थ, (हिन्दी व्या. पण्डित भाऊ शास्त्री), चौखम्भा संस्कृत संस्थान, वाराणसी.

17) ISADI-ASTOTTARASATOPANISADA, (Compiled & edited by Shri Vasudev Lakshman Panashikar), CHOWKHAMBA VIDYABHAWAN, VARANASI, 2002.

18) Eight Upanishads Vol(1), शाङ्कर भाष्य, (अंग्रेजी अनु.स्वामी गम्भीरानन्द), अद्वैत आश्रम, कलकत्ता, 1989.

**अन्तर्जालीयस्रोतांसि –**

1. http://hdl.handle.net/10603/473519
2. http://hdl.handle.net/10603/539978
3. http://hdl.handle.net/10603/66525
4. http://hdl.handle.net/10603/160606
5. http://hdl.handle.net/10603/405535